## तृतीय: अनुच्छेद:

परिवारस्य समाजस्य विद्यालयस्य संविधानस्य संसद: सेनाया: चापि केचन नियमा: सन्ति । एतेषां नियमानां परिपालनम् अनुशासनमिति कथ्यते । सकला सृष्टि: अनुशासनमनुसरति । सूर्य: चन्द्र: तारका: च नियमितसमये प्रकटीभूय अनुशासनस्य परिचयं प्रयच्छन्ति । ऋतव: एकस्मिन् मासे एव नायान्ति । ते भिन्न-मासेषु आयान्ति । गुरूणामाज्ञापालनं वृद्धानां सेवाकरणं विपत्तौ सहायताप्रदानम् इत्यादय: परिवारस्य नियमा: भवन्ति । एतेषां नियमानां परिपालनेन परिवारे आनन्दस्य वातावरणं तिष्ठति । राजमार्गस्य वामत: चलनं, यात्रापत्रग्रहणसमये पंक्तौ स्थिति:, चतुष्पथेषु मार्गनियामक-आरक्षिणां संकेतस्यानुसरणं पीडितानां सहायताकरणम् इत्यादय: समाजस्य नियमा: भवन्ति । एषां परिपालनेन समाजे शान्ति: विराजते ।

## प्रश्ना:

1. **एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**
   - (क) किं नाम अनुशासनम् ?
   - (ख) के अनुशासनस्य परिचयं प्रयच्छन्ति ?
   - (ग) परिवारस्य के नियमा: भवन्ति ?
2. **एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**
   - (क) सकला सृष्टि: किमनुसरति ?
   - (ख) एकस्मिन् मासे के न आयान्ति ?
   - (ग) यात्रापत्रग्रहणसमये कुत्र स्थातव्यम् ?
   - (घ) गुरूणामाज्ञापालनं कस्य नियमो भवति ?